## द्व्यञ्मगधकलिङ्गसूरमसादण् । (१७०/११८८)

जनपदशब्दात् क्षत्रियाभिधायिनो द्व्यचः, मगध कलिङ्ग सूरमस इत्येतेभ्यश्च अपत्ये अण् प्रत्ययो भवति । अञोऽपवादः । आङ्गः । वाङ्गः । पौण्ड्रः । सौह्मः । मागधः । कालिङ्गः । सौरमसः । [1]तस्य राजनि इत्येव, आङ्गो राजा ॥

## वृद्धेत्कोसलाजादाञ्ञ्यङ् । (१७१/११८९)

जनपदशब्दात् क्षत्रियात् इत्येव । वृद्धात्[2] प्रातिपदिकात् इकारान्तात् च, कोसलअजादशब्दाभ्यां चापत्य ञ्यङ प्रत्ययो भवति । अञोऽपवादः । वृद्धात् तावत् – आम्बष्ठ्यः । सौवीर्यः । इकारान्तात् – आवन्त्यः । कौन्त्यः । कोसलाजादयोरवृद्धार्थं वचनम् । कौसल्यः । आजाद्यः । तपरकरणम् किम् ? कुमारी नाम [3]जनपदसमानशब्दः क्षत्रियः, तस्यापत्यं कौमारः ।

[३९५] पाण्डोर्जनपदशब्दात् क्षत्रियाड् ड्यण् वक्तव्यः ।

पाण्ड्यः । अन्यस्मात् पाण्डव एव । तस्य राजनि इत्येव, आम्बष्ठ्यो राजा । आवन्त्यः । [4]कौन्त्यः । कौसल्यः । आजाद्यः ॥

## कुरुनादिभ्यो ण्यः । (१७२/११९०)

जनपदशब्दात् क्षत्रियात् इत्येव । कुरुशब्दात् नादिभ्यश्च प्रातिपदिकेभ्यो[5] ण्यः प्रत्ययो भवति । अणञोरपवादः । कौरव्यः । [6]नकारादिभ्यः – नैषध्यः । नैपथ्यः । तस्य राजनि इत्येव, कौरव्यो राजा ॥

## साल्वावयवप्रत्यग्रथकलकूटाश्मकादिञ् । (१७३/११९१)

जनपदशब्दात् क्षत्रियात् इत्येव । सल्वा [7]नाम क्षत्रिया तन्नामिका, तस्या अपत्यं, 'द्व्यचः' (४. १. १२१/ ११२४) इति ढक्, साल्वेयः । अण् अपीष्यते, साल्वः । तस्य निवासः साल्वो जनपदः । तदवयवा उदुम्बरादयः, तेभ्यः क्षत्रियवृत्तिभ्य इदं प्रत्ययविधानम् । साल्वावयवेभ्यः प्रत्यग्रथकलकूटाश्मकशब्देभ्यश्चापत्ये इञ् प्रत्ययो भवति । अञोऽपवादः । औदुम्बरिः । [8]तैलखलिः । [9]माद्रकारिः । यौगन्धरिः । भौलिङ्गिः । [10]शारदण्डिः । प्रात्यग्रथिः । कालकूटिः । आश्मकिः । तस्य राजनि इत्येव, औदुम्बरी राजा ।

उदुम्बरास्तिलखला मद्रकारा युगन्धराः ।
भुलिङ्गाः शरदण्डाश्च साल्वावयवसञ्ज्ञिताः ॥

---

1. वाक्यमिदं नास्ति फ. 2. च इत्यधिकम् फ. 3. जनपदशब्दः फ. 4. कौन्त्यः नास्ति फ. 5. अपत्ये इत्यधिकम् फ. 6. नादिभ्यः फ. 7. नाम नास्ति फ. 8. तैलखिलिः फ. 9. मद्रकारिः फ. 10. शीरदम्भिः फ.